त्रिकरास्रोपरस्थात्तु द्विकराप्युपरचका ॥
चक्रापथचतुष्पादक्षिपादस्य रचान्तरम् ।
इतोपादस्त्वर्द्धपादः प्रान्तंशः पादकः स्मृतः ॥
अवकरः परीवारः पादमात्रः समन्ततः ॥"
इति देवीपुराणे गोपुरद्वारलक्षणाध्यायः ॥ * ॥
चतुष्पथलक्षणादि यथा,—
"एकलिङ्गे श्मशाने वा शून्यागारे चतुष्पथे ।
तत्रस्थः साधयेद्योगी विद्यां त्रिभुवनेश्वरीम् ॥
चतुष्पथन्तु तत् प्रोक्तं त्रिकोणं यत्र वर्त्तते ॥"
इति नीलतन्त्रम् ॥ * ॥
पथगमनगुणाः
"अध्वा मेदःकफस्थौल्यसौकुमार्य्यविनाशनः ।
यत्तु चङ्क्रमणं नातिदेहपीड़ाकरं भवेत् ॥
तदायुर्बलमेधाग्निप्रदमिन्द्रियबोधनम् ॥"
इति राजवल्लभः ॥ * ॥
ब्राह्मणादिभ्यः पथावकाशो देयो यथा,—
"पन्था देयो ब्राह्मणाय स्त्रियै राज्ञे ह्यचक्षुषे ।
वृद्धाय भारयुक्ताय रोगिणे दुर्ब्बलाय च ॥"
इति कौर्म्मे उपविभागे ११ अध्यायः ॥ * ॥
गोपथदानफलं यथा,—
"गोमार्गस्य तथा कर्त्ता गोलोके क्रीड़ते चिरम् ।"
इति प्रतिष्ठातत्त्वे हयग्रीवपञ्चरात्रम् ॥ * ॥
अस्याचारादावुपचारो यथा,—
"तर्कोऽप्रतिष्ठः श्रुतयो विभिन्ना
नैको मुनिर्यस्य मतं प्रमाणम् ।
धर्म्मस्य तत्त्वं निहितं गुहायां
महाजनो येन गतः स पन्थाः ॥"
इति महाभारते ।३।३१२।११२। धर्म्मवकप्रश्ने युधिष्ठिरोत्तरम् ॥ * ॥ नरकविशेषः । यथा-टाव्यते । इति मनौ ४ अध्यायः ॥

पन्नं, त्रि, ( पद्यौ ङ गतौ + "गत्यर्थेति ।" ३ । ४ । ७२ । इति कर्त्तरि क्तः । ) च्युतम् । गलितम् । इत्यमरः । ३ । १ । १०४ ॥

पन्नः, पुं, ( पन स्तुतौ + "कृवृजृ षिद्रुपनीति ।" उणां । ३ । १० । इति नः स च नित् । ) अधोगमनम् । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

पन्नगः, पुं, ( पन्नं अधोगमनं पतितं वा गच्छतीति । गम ऌ गतौ + "सर्व्वत्र पन्नयोरुपसंख्यानम् ।" ३ । २ । ४८ । इत्यस्य वार्त्ति इति डः । पद्भ्यां न गच्छतीति वा विग्रहः । ) सर्पः । इत्यमरः । १ । ८ । ८ ॥ ( यथा, विष्णुपुराणे । १ । १७ । ७ ।
"पानासक्तं महात्मानं हिरण्यकशिपुं तदा ।
उपासाञ्चक्रिरे सर्व्वे सिद्धगन्धर्व्वपन्नगाः ॥" )
औषधीभेदः । पद्मकाष्ठम् । इति मेदिनी ॥

पन्नगकेशरः, पुं, ( पन्नगवत् केशरो यस्य । ) नागकेशरपुष्पम् । इति राजनिर्घण्टः ॥

पन्नगाशनः, पुं, ( पन्नगं सर्पं अश्नातीति । अश भोजने + ल्युः । पन्नगः अशनं भक्ष्यो यस्येति वा । ) गरुड़ः । इत्यमरः । १ । १ । ३१ ॥

पन्नगी, स्त्री, ( पन्नग + जातौ ङीष् । ) पन्नगपत्नी । ( यथा, भागवते । ३ । १८ । ११ ।
"तां स आपततीं वीक्ष्य भगवान् समवस्थितः ।
जग्राह लीलया प्राप्तां गरुत्मानिव पन्नगीम् ॥")
मनसा देवी । यथा, तिथितत्त्वे ।
"पञ्चम्यामसिते पक्षे सुप्तेत्तिष्ठति पन्नगी ॥"
सर्पिणीक्षुपः । इति राजनिर्घण्टः ॥

पन्नद्धा, स्त्री, ( पदि नद्धा बद्धा । ) चर्म्मपादुका । इति हेमचन्द्रः ॥

पन्नद्धी, स्त्री, ( पदोस्सरणयोर्नद्धी ।) चर्म्मपादुका । इति त्रिकाण्डशेषः ॥

पपिः, पुं, ( पाति लोकम् । पिवति वा । पा + "आदृगमहनजनः किकिनौ लिट् च ।" ३।२।१७१ । इति किः द्वित्वञ्च ।) चन्द्रः । पानकर्त्तरि त्रि । इति संक्षिप्तसारव्याकरणम् ॥ ( यथा, ऋग्वेदे ।६।२३।४। "पपिः सोमं ददिर्गाः ॥")

पपीः, पुं, ( पाति लोकम् । पा रक्षणे + "पापोः कित् द्वे च ।" उणां । ३ । १५६ । इति ईक् द्वित्वञ्च । ) सूर्य्यः । चन्द्रः । इत्युणादिकोषः ॥

पपुः, पुं, ( पाति रक्षतीति । "कुर्भ्रश्चेति ।" उणां । १ । २३ । इति चकारात् अन्यतोऽपि कुर्द्वित्वञ्च ।) पालकः । धात्र्यां स्त्री । इत्युणादिकोषः ॥

पमरा, स्त्री, गन्धद्रव्यविशेषः । सक्षुकी इति ख्याता । अस्यानुलेपनगुणाः । परमालक्ष्मीरचोज्वरनाशित्वम् । इति राजवल्लभः ॥

पम्पा, स्त्री, ( पाति रक्षति महर्ष्यादीन् स्वीयपवित्रसलिलदानादिभिरिति शेषः । पा पालने + "खष्प-शिल्प-शष्प-वाष्प-रूप-पम्पा-तल्पाः ।" उणां । ३ । २८ । इति निपातनात् ह्रस्वले सुड़ागमश्च साधुः । ) ओड्रदेशस्थनदीविशेषः । इत्युणादिकोषः ॥ ( यथा, रघुः । १३ । ३० ।
"दूरावतीर्णा पिवतीव खेदा-
दमूनि पम्पासलिलानि दृष्टिः ॥"
इयं हि ऋष्यमूकपर्व्वतसन्निकटस्था । इति रामायणम् ॥ )

पम्ब, गतौ । ( भ्वां-परं-सकं-सेट् । ) ओष्ठ्यवर्गशेषोपधः । पम्बति । इति दुर्गादासः ॥

पय, ङ गतौ । इति कविकल्पद्रुमः ॥ ( भ्वां-आत्मं-सकं-सेट् । ) ङ, पयते । इति दुर्गादासः ॥

पयः, [स्] क्ली, ( पय्यते पीयते वा पय गतौ पी ङ पाने वा + "सर्व्वधातुभ्योऽसुन् ।" उणां । ४ । १८८ । इत्यसुन् । ) जलम् । (यथा, रघुः ।१।६७। "पयः पूर्व्वैः स्वनिश्वासैः कवोष्णमुपभुज्यते ॥") दुग्धम् । इति मेदिनी ॥ ( यथा, मनुः । ३ । ८२ ।
"कुर्य्यादहरहः श्राद्धमन्नाद्येनोदकेन वा ।
पयोमूलफलैर्व्वापि पितृभ्यः प्रीतिमावहन् ॥")

पयःकन्दा, स्त्री, ( पयः कन्दे यस्याः । ) क्षीरविदारी । इति राजनिर्घण्टः ॥

पयःफेनी, स्त्री, (पयो दुग्धमिव फेनमस्याः । गौरादित्वात् ङीष् । ) दुग्धफेनीक्षुपः । इति राजनिर्घण्टः ॥

पयश्चयः, पुं, ( पयसां चयः समूहः । ) जलसमूहः । तत्पर्य्यायः । पूरः२ वेणिः ३ । इति जटाधरः ॥

पयस्यं, त्रि, ( पयसो विकारस्तत्र हितं वा । पयस् + "गोपयसोर्यत् ।" ४ । ३ । १६० । इति यत् । ) पयोविकारः । घृतदध्यादि । इत्यमरः । २ । ९ । ५१ ॥ पयोहितम् । इति मेदिनी ॥

पयस्यः, पुं, ( पयः पिबतीति । ) विड़ालः । इति शब्दचन्द्रिका ॥

पयस्या, स्त्री, ( पयस्य + टाप् । ) दुग्धिका । क्षीरकाकोली । स्वर्णक्षीरी । इति मेदिनी ॥ अर्कपुष्पिका । इति रत्नमाला ॥ कुटुम्बिनीक्षुपः । इति राजनिर्घण्टः ॥ आमिक्षा । इति हेमचन्द्रः ॥

पयस्वलः, पुं, ( पयोऽस्त्यस्य । पयस् + "अन्येभ्योऽपीति ।" वलच् । ) छागः । इति राजनिर्घण्टः ॥

पयस्विनी, स्त्री, ( पयो विद्यतेऽस्याः । "अस्मायामेधास्रजो विनिः ।" ५ । २ । १२१ । इति विनिः ततो ङीप् । ) नदी । ( प्रशस्तजलवत्त्वात्तथा पुण्यसलिलत्वाद् गङ्गा । यथा, काशीखण्डे गङ्गासहस्रनामकीर्त्तने । २९ । १०६ ।
"परापरफलप्राप्तिः पावनी च पयस्विनी ॥" )
धेनुः । ( यथा, रघुः, । २ । २१ ।
"प्रदक्षिणीकृत्य पयस्विनीन्तां
सुदक्षिणा साक्षतपात्रहस्ता ॥")
रात्रिः । इति मेदिनी ॥ काकोली । क्षीरकाकोली । दुग्धफेनी । क्षीरविदारी । छागी । इति राजनिर्घण्टः ॥ जीवन्ती इति भावप्रकाशः ॥ ( गायत्त्रीस्वरूपा महादेवी । यथा, देवीभागवते । १२ । ६ । ८६ ।
"प्रज्ञावती सुता पौत्री पुत्रपूज्या पयस्विनी ॥")

पयोगड़ः, पुं, ( पयसो गड़ इव । ) घनोपलः । द्वीपः । इति शब्दमाला ॥

पयोघनः, पुं, ( पयोभिर्घनः सान्द्रः । ) घनोपलः । इति हारावली ॥

पयोजन्मा, [न्] पुं, (पयसो जलस्य जन्म यस्मात् ।) मेघः । इति शब्दमाला ॥

पयोधरः, पुं, ( धरतीति धरः । धृ + अच् । पयसो दुग्धस्य जलस्य वा धरः । ) स्त्रीस्तनः । ( यथा, रघुः । १४ । २२ ।
"षड़ाननापीतपयोधरासु
नेता चमूनामिव कृत्तिकासु ॥" )
मेघः । इत्यमरः । ३ । ३ । १६३ ॥ कोषकारः । नारिकेलम् । कशेरु । इति मेदिनी ॥

पयोधाः, [स्] पुं, (पयो जलं दधातीति । डु धाञ् लि धारणे + "पयसि च ।" उणां । ४ । २२९ । इति असिः ।) समुद्रः । जलाधारः । इत्युणादिकोषः ॥

पयोधिः, पुं, (पयांसि धीयन्तेऽस्मिन् । डु धा ञ् + "कर्म्मण्यधिकरणे च ।" ३ । ३ । ९३ । इति किः । ) समुद्रः । इति राजनिर्घण्टः ॥

पयोधिकं, क्ली, ( पयोधौ समुद्रे कायति प्रकाशते इति । कै + कः । ) समुद्रफेनः । इति राजनिर्घण्टः ॥